International Journal of Sanskrit Research 2022; 8(5): 161-168

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 161-168
© 2022 IJSR
www.anantaajournal.com
Received: 25-09-2022
Accepted: 11-10-2022

**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

# श्रीमद्भगवद्गीतायाः तृतीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शः

**डॉ. धर्मेश शर्मा**

**सारांश**
श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्त्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायाः तृतीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।

**कूटशब्दः** श्रीमद्भगवद्गीतायाः, तृतीयाध्यायस्य, तिङन्तपदानाम्, व्याकरणात्मकः, प्रकृतिप्रत्ययप्रक्रियाविमर्शः

## प्रस्तावना
श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्त्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायाः तृतीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।

श्रीमद्भगवद्गीतायाः तृतीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शः–

तत्र तावत्–
नियोजयसि– नि इत्युपसर्गपूर्वको युज् इत्ययं धातुः– नि युज्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण युज् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– नि युज् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– नि य् ओज् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण य् ओज् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– नि य् ओज् इ सि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण य् ओज् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– नि य् ओज् इ अ सि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– नि य् ओज् ए अ सि, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थान अय् इत्ययमादेशः– नि य् ओज् अय् अ सि– नियोजयसि।
मोहयसि– मुह् इत्ययं धातुः– मुह्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण मुह् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– मुह् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– म् ओह् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण म् ओह् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– म् ओह् इ सि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण म् ओह् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– म् ओह् इ अ सि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– म् ओह् ए अ सि, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थान अय् इत्ययमादेशः– म् ओह् अय् अ सि– मोहयसि।
वद– वद् इत्ययं धातुः– वद्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण वद् इत्यस्मात् परो लोट् लकारः, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– वद् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– वद् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वद् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वद् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– वद् अ– वद।

आप्नुयाम्– आप् इत्ययं धातुः– आप्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण आप् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् इत्ययं प्रत्ययः– आप् मिप्, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण मिप् इत्यस्य स्थाने अम् इत्ययमादेशः– आप् अम्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण अम् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– आप् यास् अम्, 'स्वादिभ्यः श्नुः' (अष्टाध्यायीसूत्रपाठः 3/1/73) इत्यनेन सूत्रेण आप् इत्यस्मात् परः श्नु (नु) इत्ययं प्रत्ययः– आप् नु यास् अम्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– आप् नु या अम्, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण आ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– आप् नु य् आ म्– आप्नुयाम्।

अश्नुते– अश् इत्ययं धातुः– अश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण अश् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– अश् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– अश् त् ए, 'स्वादिभ्यः श्नुः' (अष्टाध्यायीसूत्रपाठः 3/1/73) इत्यनेन सूत्रेण अश् इत्यस्मात् परः श्नु (नु) इत्ययं प्रत्ययः– अश् नु त् ए– अश्नुते।

समधिगच्छति– सम्, अधि इत्युपसर्गपूर्वको गम् इत्ययं धातुः– सम् अधि गम्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण गम् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– सम् अधि गम् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण गम् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– सम् अधि गम् अ ति, 'इषुगमियमां छः' (अष्टाध्यायीसूत्रपाठः 7/3/77) इत्यनेन सूत्रेण म् इत्यस्य स्थाने छ् इत्ययमादेशः– सम् अधि ग छ् अ ति, 'छे च' (अष्टाध्यायीसूत्रपाठः 6/1/71) इत्यनेन सूत्रेण अ इत्यस्यान्ते तुक् (त्) इत्ययमागमः– सम् अधि ग त् छ् अ ति, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण त् इत्यस्य स्थाने च् इत्ययमादेशः– सम् अधि ग च् छ् अ ति– समधिगच्छति।

तिष्ठति– ष्ठा इत्ययं धातुः– ष्ठा, 'धात्वादेः षः सः' (अष्टाध्यायीसूत्रपाठः 6/1/62) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने स् इत्ययमादेशः– स् ठा, 'निमित्तापाये नैमित्तिकस्याप्यपायो भवति' (वार्तिकपाठः) इत्यनेन वार्तिकेन ठ् इत्यस्य स्थाने थ् इत्ययमादेशः– स् थ् आ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण स् थ् आ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– स् थ् आ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स् थ् आ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– स् थ् आ अ ति, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण स् थ् आ इत्यस्य स्थाने तिष्ठ् इत्ययमादेशः– तिष्ठ् अ ति– तिष्ठति।

कार्यते– कृ इत्ययं धातुः– कृ, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण कृ इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– कृ इ, 'अचो ञ्णिति' (अष्टाध्यायीसूत्रपाठः 7/2/115) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने वृद्धिसंज्ञकः (आर्) इत्ययमादेशः– क् आर् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण क् आर् इ इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– क् आर् इ त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– क् आर् इ त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण क् आर् इ इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– क् आर् इ य त् ए, 'णेरनिटि' (अष्टाध्यायीसूत्रपाठः 6/4/51) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– क् आर् य त् ए– कार्यते।

आस्ते– आस् इत्ययं धातुः– आस्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण आस् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– आस् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– आस् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण आस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– आस् शप् त् ए, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– आस् त् ए– आस्ते।

आरभते– आ इत्युपसर्गपूर्वको रभ् इत्ययं धातुः– आ रभ्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण रभ् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– आ रभ् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– आ रभ् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण रभ् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– आ रभ् अ त् ए– आरभते।

विशिष्यते– वि इत्युपसर्गपूर्वकः शास् इत्ययं धातुः– वि शास्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण शास् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– वि शास् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– वि शास् त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण शास् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– वि शास् य त् ए, 'शास इदङ्हलोः' (अष्टाध्यायीसूत्रपाठः 6/4/34) इत्यनेन सूत्रेण आ इत्यस्य स्थान इ इत्ययमादेशः– वि श् इ स् य त् ए, 'शासिवसिघसीनां च' (अष्टाध्यायीसूत्रपाठः 8/3/60) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– वि श् इ ष् य त् ए– विशिष्यते।

प्रसिद्ध्येत्– प्र इत्युपसर्गपूर्वकः सिध् इत्ययं धातुः– प्र सिध्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण सिध् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– प्र सिध् ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– प्र सिध् त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– प्र सिध् यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– प्र सिध् यास् स् त्, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण सिध् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– प्र सिध् य यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– प्र सिध् य या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– प्र सिध् य इय् त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– प्र सिध् य् ए य् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– प्र सिध् य् ए त्, 'अनचि च' (अष्टाध्यायीसूत्रपाठः 8/4/46) इत्यनेन सूत्रेण ध् इत्यस्य स्थाने ध् ध् इत्ययं द्विर्वचनादेशः– प्र सि ध् ध् य् ए त्, 'झलां जश्झशि' (अष्टाध्यायीसूत्रपाठः 8/4/52) इत्यनेन सूत्रेण ध् इत्यस्य स्थाने जश् (द्) इत्ययमादेशः– प्र सि द् ध् य् ए त्– प्रसिद्ध्येत्।

समाचर– सम् आ इत्युपसर्गपूर्वकः चर् इत्ययं धातुः– सम् आ चर्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण चर् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– सम् आ चर् सि, 'सेर्ह्यपिच्च'

(अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– सम् आ चर् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण चर् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– सम् आ चर् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– सम् आ चर् अ– समाचर।

प्रसविष्यध्वम्– प्र इत्युपसर्गपूर्वकः षु इत्ययं धातुः– प्र षु, 'धात्वादेः षः सः' (अष्टाध्यायीसूत्रपाठः 6/1/62) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने स् इत्ययमादेशः– प्र स् उ, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण स् उ इत्यस्मात् परो लोट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, बहुवचनम्, ध्वम् इत्ययं प्रत्ययः– प्र स् उ ध्वम्, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अम् इत्यस्य स्थान ए इत्ययमादेशः– प्र स् उ ध्व् ए, 'सवाभ्यां वामौ' (अष्टाध्यायीसूत्रपाठः 3/4/91) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अम् इत्ययमादेशः– प्र स् उ ध्व् अम्, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण स् उ इत्यस्मात् परः (छान्दसो व्यत्ययः) स्य इत्ययं प्रत्ययः– प्र स् उ स्य ध्व् अम्, 'आर्धधातुकस्येड् वलादेः' (अष्टाध्यायीसूत्रपाठः 7/2/35) इत्यनेन सूत्रेण स्य इत्यस्यादौ (छान्दसो व्यत्ययः) इट् (इ) इत्ययमागमः– प्र स् उ इ स्य ध्व् अम्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– प्र स् ओ इ स्य ध्व् अम्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– प्र स् अव् इ स्य ध्व् अम्, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– प्र स् अव् इ ष् य ध्व् अम्– प्रसविष्यध्वम्।

अस्तु– अस् इत्ययं धातुः– अस्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण अस् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अस् ति, 'एरुः' (अष्टाध्यायीसूत्रपाठः 3/4/86) इत्यनेन सूत्रेण इ इत्यस्य स्थान उ इत्ययमादेशः– अस् त् उ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– अस् शप् त् उ, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– अस् त् उ– अस्तु।

भावयत– भू इत्ययं धातुः– भू, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण भू इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– भू इ, 'अचो ञ्णिति' (अष्टाध्यायीसूत्रपाठः 7/2/115) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने वृद्धिसंज्ञकः (औ) इत्ययमादेशः– भ् औ इ, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण औ इत्यस्य स्थान आव् इत्ययमादेशः– भ् आव् इ, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण भ् आव् इ इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, बहुवचनम्, थ इत्ययं प्रत्ययः– भ् आव् इ थ, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण थ इत्यस्य स्थाने त इत्ययमादेशः– भ् आव् इ त, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भ् आव् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भ् आव् इ अ त, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– भ् आव् ए अ त, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– भ् आव् अय् अ त– भावयत।

भावयन्तु– भू इत्ययं धातुः– भू, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण भू इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– भू इ, 'अचो ञ्णिति' (अष्टाध्यायीसूत्रपाठः 7/2/115) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने वृद्धिसंज्ञकः (औ) इत्ययमादेशः– भ् औ इ, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण औ इत्यस्य स्थान आव् इत्ययमादेशः– भ् आव् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भ् आव् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– भ् आव् इ झि, 'एरुः' (अष्टाध्यायीसूत्रपाठः 3/4/86) इत्यनेन सूत्रेण इ इत्यस्य स्थान उ इत्ययमादेशः– भ् आव् इ झ् उ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भ् आव् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भ् आव् इ अ झ् उ, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– भ् आव् इ अ अन्त् उ, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– भ् आव् ए अ अन्त् उ, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– भ् आव् अय् अ अन्त् उ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– भ् आव् अय् अ न्त् उ– भावयन्तु।

अवाप्स्यथ– अव इत्युपसर्गपूर्वक आप् इत्ययं धातुः– अव आप्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण आप् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, बहुवचनम्, थ इत्ययं प्रत्ययः– अव आप् थ, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण आप् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– अव आप् स्य थ, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण अ आ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– अव् आ प् स्य थ– अवाप्स्यथ।

दास्यन्ते– दा इत्ययं धातुः– दा, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण दा इत्यस्मात् परो लृट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– दा झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– दा झ् ए, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण दा इत्यस्मात् परः स्य इत्ययं प्रत्ययः– दा स्य झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– दा स्य अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– दा स्य् अ न्त् ए– दास्यन्ते।

भुङ्क्ते– भुज् इत्ययं धातुः– भुज्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भुज् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– भुज् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– भुज् त् ए, 'रुधादिभ्यः श्नम्' (अष्टाध्यायीसूत्रपाठः 3/1/78) इत्यनेन सूत्रेण उ इत्यस्मात् परः श्नम् (न) इत्ययं प्रत्ययः– भु न ज् त् ए, 'श्नसोरल्लोपः' (अष्टाध्यायीसूत्रपाठः 6/4/111) इत्यनेन सूत्रेण अ इत्यस्य लोपसंज्ञकमदर्शनम्– भु न् ज् त् ए, 'चोः कुः' (अष्टाध्यायीसूत्रपाठः 8/2/30) इत्यनेन सूत्रेण ज् इत्यस्य स्थाने ग् इत्ययमादेशः– भु न् ग् त् ए, 'खरि च' (अष्टाध्यायीसूत्रपाठः 8/4/54) इत्यनेन सूत्रेण ग् इत्यस्य स्थाने चर् (क्) इत्ययमादेशः– भु न् क् त् ए, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण न् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– भुं क् त् ए, 'अनुस्वारस्य ययि परसवर्णः' (अष्टाध्यायीसूत्रपाठः 8/4/57) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (ङ्) इत्ययमादेशः– भु ङ् क् त् ए– भुङ्क्ते।

मुच्यन्ते– मुच् इत्ययं धातुः– मुच्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण मुच् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– मुच् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– मुच् झ् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण मुच् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– मुच् य झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने

अन्त् इत्ययमादेशः– मुच् य अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– मुच् य् अ न्त् ए– मुच्यन्ते।

भुञ्जते– भुज् इत्ययं धातुः– भुज्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भुज् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– भुज् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– भुज् झ् ए, 'रुधादिभ्यः श्नम्' (अष्टाध्यायीसूत्रपाठः 3/1/78) इत्यनेन सूत्रेण उ इत्यस्मात् परः श्नम् (न) इत्ययं प्रत्ययः– भु न् ज् झ् ए, 'आत्मनेपदेष्वनतः' (अष्टाध्यायीसूत्रपाठः 7/1/5) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अत् इत्ययमादेशः– भु न् ज् अत् ए, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण न् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– भुं ज् अत् ए, 'अनुस्वारस्य ययि परसवर्णः' (अष्टाध्यायीसूत्रपाठः 8/4/57) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (ञ्) इत्ययमादेशः– भु ञ् ज् अत् ए– भुञ्जते।

पचन्ति– पच् इत्ययं धातुः– पच्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण पच् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– पच् झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण पच् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– पच् अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– पच् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– पच् अ न्त् इ– पचन्ति।

भवन्ति– भू इत्ययं धातुः– भू, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भू इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– भू झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भू इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भू अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– भू अ अन्त् इ, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– भ् ओ अ अन्त् इ, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– भ् अव् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– भ् अव् अ न्त् इ– भवन्ति।

अनुवर्तयति– अनु इत्युपसर्गपूर्वको वृत् इत्ययं धातुः– अनु वृत्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– अनु वृत् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– अनु व् अर् त् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण व् अर् त् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अनु व् अर् त् इ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण व् अर् त् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु व् अर् त् इ अ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– अनु व् अर् त् ए अ ति, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– अनु व् अर् त् अय् अ ति– अनुवर्तयति।

जीवति– जीव् इत्ययं धातुः– जीव्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जीव् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– जीव् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण जीव् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– जीव् अ ति– जीवति।

आचरति– आ इत्युपसर्गपूर्वकः चर् इत्ययं धातुः– आ चर्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण चर् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– आ चर् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण चर् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– आ चर् अ ति– आचरति।

कुरुते– कृ इत्ययं धातुः– कृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– कृ त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– कृ त् ए, 'तनादिकृञ्भ्य उः' (अष्टाध्यायीसूत्रपाठः 3/1/79) इत्यनेन सूत्रेण कृ इत्यस्मात् पर उ इत्ययं प्रत्ययः– कृ उ त् ए, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् उ त् ए, 'अत उत्सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/110) इत्यनेन सूत्रेण अ इत्यस्य स्थान उ इत्ययमादेशः– क् उ र् उ त् ए– कुरुते।

अनुवर्तते– अनु इत्युपसर्गपूर्वको वृत् इत्ययं धातुः– अनु वृत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– अनु वृत् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– अनु वृत् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु वृत् अ त् ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– अनु व् अर् त् अ त् ए– अनुवर्तते।

वर्ते– वृत् इत्ययं धातुः– वृत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, उत्तमपुरुषः, एकवचनम्, इट् (इ) इत्ययं प्रत्ययः– वृत् इ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण इ इत्यस्य स्थान ए इत्ययमादेशः– वृत् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वृत् अ ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– व् अर् त् अ ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ ए इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– व् अर् त् ए– वर्ते।

वर्तेयम्– वृत् इत्ययं धातुः– वृत्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् इत्ययं प्रत्ययः– वृत् मिप्, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण मिप् इत्यस्य स्थाने अम् इत्ययमादेशः– वृत् अम्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण अम् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– वृत् यास् अम्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वृत् अ यास् अम्, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– व् अर् त् अ यास् अम्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– व् अर् त् अ या अम्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– व् अर् त् अ इय् अम्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः

स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– व् अर् त् ए य् अम्– वर्तेयम्।

अनुवर्तन्ते– वृत् इत्ययं धातुः– वृत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– अनु वृत् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– अनु वृत् झ् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु वृत् अ झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– अनु वृत् अ अन्त् ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– अनु व् अर् त् अ अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– अनु व् अर् त् अ न्त् ए– अनुवर्तन्ते।

उत्सीदेयुः– उत् इत्युपसर्गपूर्वकः षद् इत्ययं धातुः– उत् षद्, 'धात्वादेः षः सः' (अष्टाध्यायीसूत्रपाठः 6/1/62) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने स् इत्ययमादेशः– उत् स् अ द्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण स् अ द् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– उत् स् अ द् झि, 'झेर्जुस्' (अष्टाध्यायीसूत्रपाठः 3/4/108) इत्यनेन सूत्रेण झि इत्यस्य स्थाने जुस् (उस्) इत्ययमादेशः– उत् स् अ द् उस्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण उस् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– उत् स् अ द् यास् उस्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स् अ द् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– उत् स् अ द् अ यास् उस्, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण स् अ द् इत्यस्य स्थाने सीद् इत्ययमादेशः– उत् सीद् अ यास् उस्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– उत् सीद् अ या उस्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– उत् सीद् अ इय् उस्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– उत् सीद् ए य् उस्, रुत्वम्, विसर्गः– उत् सीद् ए य् उः– उत्सीदेयुः।

कुर्याम्– कृ इत्ययं धातुः– कृ, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् इत्ययं प्रत्ययः– कृ मिप्, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण मिप् इत्यस्य स्थाने अम् इत्ययमादेशः– कृ अम्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण अम् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– कृ यास् अम्, 'तनादिकृञ्भ्य उः' (अष्टाध्यायीसूत्रपाठः 3/1/79) इत्यनेन सूत्रेण कृ इत्यस्मात् पर उ इत्ययं प्रत्ययः– कृ उ यास् अम्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् उ यास् अम्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– क् अर् उ या अम्, 'अत उत्सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/110) इत्यनेन सूत्रेण अ इत्यस्य स्थान उ इत्ययमादेशः– क् उर् उ या अम्, 'ये च' (अष्टाध्यायीसूत्रपाठः 6/4/109) इत्यनेन सूत्रेण उ इत्यस्य लोपसंज्ञकमदर्शनम्– क् उर् या अम्, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण आ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– क् उर् य् आ म्– कुर्याम्।

स्याम्– अस् इत्ययं धातुः– अस्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण अस् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् इत्ययं प्रत्ययः– अस् मिप्, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण मिप् इत्यस्य स्थाने अम् इत्ययमादेशः– अस् अम्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण अम् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– अस् यास् अम्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– अस् शप् यास् अम्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– अस् यास् अम्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– अस् या अम्, 'श्नसोरल्लोपः' (अष्टाध्यायीसूत्रपाठः 6/4/111) इत्यनेन सूत्रेण अ इत्यस्य लोपसंज्ञकमदर्शनम्– स् या अम्, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण आ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– स् य् आ म्– स्याम्।

उपहन्याम्– उप इत्युपसर्गपूर्वको हन् इत्ययं धातुः– उप हन्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण हन् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् इत्ययं प्रत्ययः– उप हन् मिप्, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण मिप् इत्यस्य स्थाने अम् इत्ययमादेशः– उप हन् अम्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण अम् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– उप हन् यास् अम्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हन् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– उप हन् शप् यास् अम्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– उप हन् यास् अम्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– उप हन् या अम्, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण आ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– उप हन् य् आ म्– उपहन्याम्।

कुर्वन्ति– कृ इत्ययं धातुः– कृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– कृ झि, 'तनादिकृञ्भ्य उः' (अष्टाध्यायीसूत्रपाठः 3/1/79) इत्यनेन सूत्रेण कृ इत्यस्मात् पर उ इत्ययं प्रत्ययः– कृ उ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– कृ उ अन्त् इ, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् उ अन्त् इ, 'अत उत्सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/110) इत्यनेन सूत्रेण अ इत्यस्य स्थान उ इत्ययमादेशः– क् उर् उ अन्त् इ, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण उ इत्यस्य स्थाने यण् (व्) इत्ययमादेशः– क् उर् व् अन्त् इ– कुर्वन्ति।

कुर्यात्– कृ इत्ययं धातुः– कृ, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– कृ ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– कृ त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– कृ यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त्

इत्यस्यादौ सुट् (स्) इत्ययमागमः– कृ यास् स् त्, 'तनादिकृञ्भ्य उः' (अष्टाध्यायीसूत्रपाठः 3/1/79) इत्यनेन सूत्रेण कृ इत्यस्मात् पर उ इत्ययं प्रत्ययः– कृ उ यास् स् त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् उ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– क् अर् उ या त्, 'अत उत्सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/110) इत्यनेन सूत्रेण अ इत्यस्य स्थान उ इत्ययमादेशः– क् उर् उ या त्, 'ये च' (अष्टाध्यायीसूत्रपाठः 6/4/109) इत्यनेन सूत्रेण उ इत्यस्य लोपसंज्ञकमदर्शनम्– क् उर् या त्– कुर्यात्।

जनयेत्– जन् इत्ययं धातुः– जन्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण जन् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– जन् इ, 'अत उपधायाः' (अष्टाध्यायीसूत्रपाठः 7/2/116) इत्यनेन सूत्रेण अ इत्यस्य स्थाने वृद्धिसंज्ञकः (आ) इत्ययमादेशः– ज् आ न् इ, 'मितां ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 6/4/92) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ह्रस्वसंज्ञकः (अ) इत्ययमादेशः– ज् अ न् इ, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण ज् अ न् इ इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– ज् अ न् इ ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– ज् अ न् इ त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– ज् अ न् इ यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– ज् अ न् इ यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ज् अ न् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– ज् अ न् इ अ यास् स् त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– ज् अ न् ए अ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– ज् अ न् ए अ या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– ज् अ न् ए अ इय् त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– ज् अ न् ए ए य् त्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– ज् अ न् अय् ए य् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– ज् अ न् अय् ए त्– जनयेत्।

जोषयेत्– जुष् इत्ययं धातुः– जुष्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण जुष् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– जुष् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– ज् ओ ष् इ, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण ज् ओ ष् इ इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– ज् ओ ष् इ ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– ज् ओ ष् इ त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– ज् ओ ष् इ यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– ज् ओ ष् इ यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ज् ओ ष् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– ज् ओ ष् इ अ यास् स् त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– ज् ओ ष् ए अ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– ज् ओ ष् ए अ या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– ज् ओ ष् ए अ इय् त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– ज् ओ ष् ए ए य् त्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– ज् ओ ष् अय् ए य् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– ज् ओ ष् अय् ए त्– जोषयेत्।

वर्तन्ते– वृत् इत्ययं धातुः– वृत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– वृत् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– वृत् झ् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वृत् अ झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– वृत् अ अन्त् ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– व् अर् त् अ अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– व् अर् त् अ न्त् ए– वर्तन्ते।

सज्जते– सज्ज् इत्ययं धातुः– सज्ज्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण सज्ज् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– सज्ज् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– सज्ज् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण सज्ज् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– सज्ज् अ त् ए– सज्जते।

सज्जन्ते– सज्ज् इत्ययं धातुः– सज्ज्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण सज्ज् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– सज्ज् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– सज्ज् झ् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण सज्ज् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– सज्ज् अ झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– सज्ज् अ अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– सज्ज् अ न्त् ए– सज्जन्ते।

विचालयेत्– वि इत्युपसर्गपूर्वकः चल् इत्ययं धातुः– वि चल्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण चल् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– वि चल् इ, 'अत उपधायाः' (अष्टाध्यायीसूत्रपाठः 7/2/116) इत्यनेन सूत्रेण अ इत्यस्य स्थाने वृद्धिसंज्ञकः (आ) इत्ययमादेशः– वि च् आ ल् इ, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण च् आ ल् इ इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– वि च् आ ल् इ ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– वि च् आ ल् इ त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– वि च् आ ल् इ यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– वि च् आ ल् इ यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण च् आ ल् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वि च् आ ल् इ अ यास् स्

त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– वि च् आ ल् ए अ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– वि च् आ ल् ए अ या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– वि च् आ ल् ए अ इय् त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– वि च् आ ल् ए ए य् त्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– वि च् आ ल् अय् ए य् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– वि च् आ ल् अय् ए त्– विचालयेत्।

अनुतिष्ठन्ति– अनु इत्युपसर्गपूर्वकः ष्ठा इत्ययं धातुः– अनु ष्ठा, 'धात्वादेः षः सः' (अष्टाध्यायीसूत्रपाठः 6/1/62) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने स् इत्ययमादेशः– अनु स् ठा, 'निमित्तापाये नैमित्तिकस्याप्यपायो भवति' (वार्त्तिकपाठः) इत्यनेन वार्त्तिकेन ठ् इत्यस्य स्थाने थ् इत्ययमादेशः– अनु स् थ् आ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण स् थ् आ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– अनु स् थ् आ झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स् थ् आ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु स् थ् आ अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– अनु स् थ् आ अ अन्त् इ, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण स् थ् आ इत्यस्य स्थाने तिष्ठ् इत्ययमादेशः– अनु तिष्ठ् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– अनु तिष्ठ् अ न्त् इ– अनुतिष्ठन्ति।

चेष्टते– चेष्ट् इत्ययं धातुः– चेष्ट्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण चेष्ट् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– चेष्ट् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– चेष्ट् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण चेष्ट् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– चेष्ट् अ त् ए– चेष्टते।

यान्ति– या इत्ययं धातुः– या, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण या इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– या झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण या इत्यस्मात् परः शप् इत्ययं प्रत्ययः– या शप् झि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– या झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– या अन्त् इ, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण आ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– य् आ न्त् इ– यान्ति।

करिष्यति– कृ इत्ययं धातुः– कृ, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण कृ इत्यस्मात् परो ऌट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– कृ ति, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण कृ इत्यस्मात् परः स्य इत्ययं प्रत्ययः– कृ स्य ति, 'ऋद्धनोः स्ये' (अष्टाध्यायीसूत्रपाठः 7/2/70) इत्यनेन सूत्रेण स्य इत्यस्यादा इट् (इ) इत्ययमागमः– कृ इ स्य ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् इ स्य ति, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– क् अर् इ ष् य ति– करिष्यति।

आगच्छेत्– आ इत्युपसर्गपूर्वको गम् इत्ययं धातुः– आ गम्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण गम् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– आ गम् ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– आ गम् त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– आ गम् यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– आ गम् यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण गम् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– आ गम् अ यास् स् त्, 'इषुगमियमां छः' (अष्टाध्यायीसूत्रपाठः 7/3/77) इत्यनेन सूत्रेण म् इत्यस्य स्थाने छ् इत्ययमादेशः– आ ग छ् अ यास् स् त्, 'छे च' (अष्टाध्यायीसूत्रपाठः 6/1/71) इत्यनेन सूत्रेण अ इत्यस्यान्ते तुक् (त्) इत्ययमागमः– आ ग त् छ् अ यास् स् त्, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण त् इत्यस्य स्थाने च् इत्ययमादेशः– आ ग च् छ् अ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– आ ग च् छ् अ या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– आ ग च् छ् अ इय् त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– आ ग च् छ् ए य् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– आ ग च् छ् ए त्– आगच्छेत्।

आव्रियते– आ इत्युपसर्गपूर्वको वृ इत्ययं धातुः– आ वृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृ इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– आ वृ त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– आ वृ त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण वृ इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– आ वृ य त् ए, 'रिङ् शयग्लिङ्क्षु' (अष्टाध्यायीसूत्रपाठः 7/4/28) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने रिङ् (रि) इत्ययमादेशः– आ व् रि य त् ए– आव्रियते।

विमोहयति– वि इत्युपसर्गपूर्वको मुह् इत्ययं धातुः– वि मुह्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण मुह् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– वि मुह् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– वि म् ओ ह् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण म् ओ ह् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– वि म् ओ ह् इ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण म् ओ ह् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वि म् ओ ह् इ अ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– वि म् ओ ह् ए अ ति, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– वि म् ओ ह् अय् अ ति– विमोहयति।

प्रजहि– प्र इत्युपसर्गपूर्वको हन् इत्ययं धातुः– प्र हन्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण हन् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– प्र हन् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– प्र हन् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हन्

इत्यस्मात् परः शप् इत्ययं प्रत्ययः– प्र हन् शप् हि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– प्र हन् हि, 'हन्तेर्जः' (अष्टाध्यायीसूत्रपाठः 6/4/36) इत्यनेन सूत्रेण हन् इत्यस्य स्थाने ज इत्ययमादेशः– प्र ज हि– प्रजहि।

आहुः– ब्रू इत्ययं धातुः– ब्रू, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– ब्रू झि, 'ब्रुवः पञ्चानामादित आहो ब्रुवः' (अष्टाध्यायीसूत्रपाठः 3/4/84) इत्यनेन सूत्रेण झि इत्यस्य स्थान उस् इत्ययमादेशो ब्रू इत्यस्य च स्थान आह् इत्ययमादेशश्च– आह् उस्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण आह् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– आह् शप् उस्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– आह् उस्, रुत्वम्, विसर्गः– आह् उः– आहुः।

जहि– हन् इत्ययं धातुः– हन्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण हन् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– हन् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– हन् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हन् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– हन् शप् हि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– हन् हि, 'हन्तेर्जः' (अष्टाध्यायीसूत्रपाठः 6/4/36) इत्यनेन सूत्रेण हन् इत्यस्य स्थाने ज इत्ययमादेशः– ज हि– जहि। इति।।

## संदर्भ सूची


1. अष्टाध्यायीसूत्रपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
2. धातुपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
3. अष्टाध्यायीभाष्यम् (प्रथमावृत्तिः), त्रयो भागाः– लेखकौ– पण्डित ब्रह्मदत्त जिज्ञासु, प्रज्ञादेवी व्याकरणाचार्या, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
4. माधवीया धातुवृत्तिः (सायणविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
5. पारिभाषिकः– व्याख्याकारः– आचार्य प्रद्युम्न, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
6. वार्त्तिकप्रकाशः– लेखकः– आनन्दप्रकाश मेधार्थी, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।
7. काशिका (वामनजयादित्यविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
8. व्याकरणमहाभाष्यम् (महर्षिपतञ्जलिमुनिविरचितम्, प्रदीपोद्योतटीकाद्वयसहितम्), षड् भागाः– सम्पादकः– श्री भार्गव शास्त्री, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।